जनवरी तः मार्चः २०२५ पर्यन्तम्
पौष-शुक्ल-द्वितीया तः चैत्र-शुक्ल-तृतीया पर्यन्तम्
(वै-२०८१)

RNI
DELSAN/2013/50379
ISSN:2347-1565

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम्-१२ संयुक्ताङ्कः-६-८



सम्पादकः
डॉ. अरुणकुमारझा
सचिवः

एक साहित्यिक त्रैमासिक शोध पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ ही शोध छात्रों एवं नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

# "संस्कृत मञ्जरी"

(आई.एस.एस.एन-2278-8360)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्यः- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र

सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका

# "संस्कृत मञ्जरी"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड- IBKL 0000170 (IDBI BANK- Preet Vihar) में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता -

सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५

दूरभाष सं.- ०११-२०९२०३६३

ISSN-2347-1565

मूल्यम्- ₹25 रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

जनवरी तः मार्च २०२५ पर्यन्तम्

वर्षम्-१२-संयुक्ताङ्कः-६-८

(वै.-२०८१)

(पौष-शुक्ल-द्वितीया तः चैत्र-शुक्ल-तृतीया पर्यन्तम्)

सम्पादकः
डॉ. अरुणकुमारझा
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

सम्पादक सहायकः
मनोजकुमारः

टंकण/आवरण/सज्जा
पूजागड़ाकोटी


| क्र.सं. | अनुक्रमणिका | | पृष्ठ-संख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | संस्कृत श्लोकाः | शुभ कुशवाहः | १ |
| ३. | मम परिवारः | मंजूलता शर्मा | ४ |
| ४. | किरातस्य दीपावली | डॉ. हर्षदेवमाधवः | ५ |
| ५. | 'अनधिकार चेष्टा कदापि श्रेयस्करं न भवति' | मोती प्रसाद साहू | ७ |
| ६. | वसन्तपञ्चमी | डॉ. धनंजयकुमारमिश्रः | ८ |
| ७. | चातुर्यं भिन्नसन्धाने | ओम प्रकाश ठाकुरः | ११ |
| ८. | संस्कृतम् वैदिकं स्याद् अथवा लैकिकं | मनोज कुमार डिमरी | १४ |
| ९. | शब्दार्थाः | ,, | १९ |
| १०. | शब्दरूपम् | ,, | २० |
| ११. | धातु रूपम् | ,, | २१ |


दिल्ली संस्कृत अकादमी

(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)

DELHI SANSKRIT ACADEMY

(Govt. of N.C.T. , Delhi)

ई-पत्रिका

## प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाषः - 011-23635592, 23637798

## सदस्यताशुल्कम्

प्रति-अङ्कम् : ₹25 रूप्यकाणि

वार्षिकम् : ₹250 रूप्यकाणि

ISSN : 2347-1565

©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः अन्तरर्जालमाध्यमेन (online) अथवा सी०टी०सी० चैक माध्यमेन

(दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, Online or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com
Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

**अयि सुरभारतीसमुपकाः सुहृदयाः!**

संस्कृतसेवायां निरन्तरं सन्नद्धायाः दिल्लीसंस्कृताकादम्याः मासिकीबालपत्रिकायां संस्कृतचन्द्रिकायां बालमनोनुकूलाः रुचिवर्धकाः उत्तमाः रचनाः प्रकाश्यन्ते। गीर्वाणवाणीप्रणयिनां संस्कृताध्येतॄणां विद्यार्थिनां समक्षं संस्कृतचन्द्रिका-मासिकी-बालपत्रिकायाः द्वादशतमवर्षस्य जनवरीतः मार्च २०२५ पर्यन्तं प्रकाशितः संयुक्तांकः(६-८)समर्प्यते। संयुक्ताङ्केऽस्मिन् अनेकाः बालरचनाः यथा शुभकुशवाहस्य विविधविषयाधारिताः कतिपयाः संस्कृतश्लोकाः, डॉ. देवीसहायपाण्डेयस्य 'भारतगौरवखण्डम्' इत्यस्य काव्यस्य चतुर्थखण्डम्, मंजुलताशर्ममहोदयानां कविता 'मम परिवारः', डॉ. हर्षदेवमाधवमहोदयानां लघुकथा 'किरातस्य दीपावली', श्री मोतीप्रसादसाहूमहोदयानां एका लघुकथा 'अनधिकारचेष्टा कदापि न भवति', डॉ. धनंजयकुमारमिश्रस्य लघु-आलेखः 'वसन्तपंचमी' ओम्प्रकाशठाकुरस्य' लघुकथा 'चातुर्यं भिन्नसन्धाने' तथा च मनोजकुमारमहोदयानां विद्यार्थीनां कृते व्याकरणपरिशिष्टे शब्दार्थाः, शब्दरूपाणि तथा धातुरूपाणि' प्रकाशिताः सन्ति। सर्वाः बालरचनाः विद्यार्थिनां जिज्ञासूपाठकानां कृते अतीव रोचकाः संस्कृते रुचिवर्धकाः वर्तन्ते। आशासे बालपत्रिकेयं बालकैः सोत्साहं पठिष्यत इति।

**शकाब्दः - १९४६**

**भावत्कः**
**डॉ. अरुणकुमारझा**
**सचिवः**

# संस्कृत श्लोकाः

-शुभ कुशवाहः

सुरभिमयमतीयं, मन्द मन्दं मधुः मे।
मुदितमधुरकान्तम्, भावजालमटत् मे ।।
लभललितललाटम्, लाललग्नकपाटम्।
नवनविनसुनीलं, नीरजंमध्यकेशे ।।
कमलरममलक्तं, शोभितं पुष्पपादं ।
पगरजनगरत्ना, शोभिते भाग्यलक्ष्मीः ।।

मुखललितमनन्दम्, नेत्रपद्मौसुसंगे।
मणिमुकुटसुभाले, मामुरोमोहितानां ।।
रविशशिविधुरश्मिं, तेजते श्यामरूपं ।
पवनवहतिमन्दं, उड्डये केशं मोहे।

चपलचरणमेतत् शश्वशश्वस्स्मरामि ।
हिरणमिव सुचालं बाणवोरं प्रहन्ति ।।
कमलजलजशङ्खैः शोभिते यत् सुपादं ।
प्रहरतुमम पापं याचते भक्त राज्ञा ।।

प्रथमसुमुखरुपन्दर्शनार्थं मुमुक्षु।
कनकललितमुग्धाभूषणाभिः तु रामः ।
प्रथम-अरुण भाभान्दर्शनस्ते समानं।
सुहृदयमनसीच्छा इक्षितुं बालरूपं।

पापङ्कृत्वा, भ्रमति अवनौ कामरागार्तमन्धम्।
प्रभ्रमाणः, मृगमिवतृषा, मर्कटाटदुद्पाशं ।।
तृप्तोऽस्मि त्वं, कुरु शमयतुम्, ज्ञानतोयं त्रिनेत्र !
त्राहित्राहि त्रयभयगतं पाहि मे भूतनाथ!

मायारूपः, विकसति वपोर्भक्षतीदं शरीरम् ।
मायात्यक्त्वा, तवशरणवत् रक्ष मे प्राणिप्राण!

भूत्वार्जून: पतितविषये विस्मृतं ते महिम्न: ।
स्तोत्रेदञ्च स्मरतु रचना यच्छिवायार्पितास्ति ।।

श्वासच्छेदे, क्षणमपि न मे, ते स्मृति: न प्रविश्येत् ।
जीवन्त्या: वा, मृतिविलसने, त्वत्पदं नैव धृत्वा ।।
अज्ञानान्धं, किमपि विदितं, नैव जानामि भोक्ता।
शम्भो सम्यक्, शरणमवरे, पाहि मां देव नित्यं ।।

लोकोन्मादे भ्रमतिमनस: त्वत्पदौ विस्मरन्ति ।
दु:खाविष्टा सुखरसल वा क्लिश्यते जीवसङ्घे ।।
लिङ्गे रूपे शरणमधुना देहि मे चित्तशान्तिम् ।
भो भो शम्भू! सकलदुरितं हारय त्वं कृपालो ।।

मृत्योरन्तं परमपि सुखं त्वत्पदं चापि शाश्वत्।
ज्ञानं प्राप्य प्रणमति मनो निर्मलं त्वां च धीमान् ।।
लोकोद्धारं कुरु कृपयया शम्भु सत्यं यदुक्तम्।
त्वं संसारं भवभयहरं तापमुक्तिं प्रदासि ।।

कोटिर्लोका: स्फुरति विकला यस्य विश्वं विभाति।
ताराणां ते सहस्रमनघं जीवनं स्यादसंख्यम् ।।
एवं चिन्त्यं प्रकृतिपथिकं व्यर्थतां सम्प्रपन्नम्।
भो भो शम्भो! परमदयया ज्ञानमुक्तिं प्रदेहि।।

कामक्रोधौ लोभधमदमो मोहसंवृद्धपाश:।
येनात्मानङ्कलुषितमिवं पश्यते विश्वरूपम्।।
ज्ञानं दीपं ज्वलय हृदि मे चितशुद्धिं कुरु त्वम्।
शुद्ध तत्त्वं कुरु हृदिपते: त्वत्पदं प्रेमयोगम् ।।

कर्णौजिह्वानयनशिपियन्नासिकाहञ्च नैव।
चर्म: मज्जाधमनिरुधिरं स्थूलदेहं न मेऽहम् ।।
विस्मृत्वाहम् तदपिभवतिस्त्रीविलासस्य इच्छा।
चित: प्रज्ञा मतिमनपरा देहि मे ज्ञान्मेतत् ।।

शब्दं स्पर्श रुचिरमपि वा रुपगन्धं न मेऽहम्।
नाहं कायो न च मनसि मे चित्तवृत्तिर्न बुद्धिः ।।
त्वं जागर्ता सततममलं ज्ञानरूपं प्रकाशम् ।।
भो भो शम्भो! परमदयया सन्मतिं देहि नित्यम् ।।

कोशाः पञ्चोऽयमपि न अहं नैव कर्मेन्द्रियं मे।
प्रज्ञाचित्ते अनलपवने व्योमभूमी न वारि।।
मृत्योः भीति त्यज तु पुरुषागच्छ शम्भोः शरण्ये।
जन्माजन्मौऽभयभयपरा देहि में ज्ञानमेतत् ।

# मम परिवारः

-मंजूलता शर्मा

यथा विशालः वट वृक्षोऽस्ति
तथा दयालुः पितामहोऽस्ति॥
यथा शीतला ज्योत्सना गगने
तथा वत्सला पितामही मे॥
यथा पावनी सदैव गङ्गा।
प्रेममयी मे तथैव माता॥
शशिना सह यथैव रजनी।
तथा मया सह प्रियाऽस्तिभगिनी॥
पार्वत्या सह सदाशिवोऽस्ति।
तथा जनन्या मम जनकोऽस्ति॥
वर्षति मेघः यथा श्यामलः।
तथा वर्षति स्निग्ध मातुलः।
शिवेन सार्धं यथा शिवानी
मातुलेन गौरी मातुलानी॥
इक्षुदण्ड इव सदा मधुरः।
अहं तथा मे प्रिय परिवारः॥

-४ कैलाश विहारः
आगरा, उत्तर प्रदेशः

# किरातस्य दीपावली

-डॉ. हर्षदेवमाधवः

किरातः अष्टवर्षीयः बालः। स अतीव चञ्चलः, तेजस्वी, विचारशीलः बालकः अस्ति। सः तृतीयायां कक्षायां पठति। दीपावली समीपे अस्ति। दीपावल्याः दशदिवसानाम् अवकाशः भविष्यति। किराताय मिष्टान्नानि अतीव रोचन्ते। तस्य माता विविधानि मिष्टन्नानि पचति। तस्य पितामही चेतना अम्बा अपि किरातस्य प्रियाखाद्यानि पचति। किरातस्य अङ्गने सर्वे मृत्तिकाया दीपाम् प्रज्वलायन्ति। किराताय अग्नितारादिक्रीडा(fire-crackers) अतीव रोचते। तत्र दाडिमानि सन्ति, येभ्यः दाडिमबीजानि इव स्फुल्लिङ्गाः निर्गच्छन्ति। भुवि तेजोमयानि चक्राणि भ्रमन्ति। रोकेटसदृशानि अग्निना प्रेरितानि क्रीडानकानि नभः गच्छन्ति। केचित् स्फोटकाः(पटाखें) गगनं गत्त्वा नवनवान् वर्णान् तेजोभिः सृजन्ति। किरातः दीपावल्याः स्वप्नान् पश्यति। तदा एव तस्य पिता कार्यालयात् आयाति। किरातः पितुः हस्तात् कार्यालयस्य स्यूतं भोजनपुटं गृह्णाति। सः पितुः कृते जलम् आनयति। विद्याधरः तस्य पिता वर्तते।

**विद्याधरः** - किरात! दीपावली तु समीपे वर्तते।

**किरातः** - आम् तात!

**विद्याधरः** - तव प्रथमसत्रस्य परीक्षा अपि पूर्णा जाता।

**किरातः** - अथ किम्।

**विद्याधरः** - तर्हि वयं विपणीं गच्छामः। तव नवानि वस्त्राणि क्रीणीमः।

**किरातः** - तात, अहं तु मासद्वयात् पूर्वम् एव वस्त्राणि प्राप्तवान्।

**विद्याधरः** - तर्हि स्फोटकान् क्रेष्यामः। गतवर्षे त्वया स्फोटं कर्तुं भुशुण्डी(पिस्तोल) अपि क्रीता।

**किरातः** - किन्तु तात! तदा अहं कनिष्ठः आसम्।

[सर्वे हसन्ति]

**विद्याधरः** - किं त्वं नादयुक्तान् स्फोटकान् क्रेतुम् इच्छसि?

**किरातः** - न हि। तेषां नादेन मम मित्राणि भयम् अनुभवन्ति।
[रथ्यायाः कुक्कुराः, बिडालाः, गवाक्षेषु सुप्ताः पक्षिणः किरातस्य मित्राणि सन्ति।]

**विद्याधरः** - अधुना 'पुष्पझरी' नाम्न्यः अग्निक्रीडाशलाकाः नूनं तुभ्यं रोचन्ते।

**किरातः** - न हि, न हि। तात! मम गुरुवर्यः उपादिशद् यत् 'स्फोटकैः वायोः प्रदूषणं भवति। वृद्धजनाः रात्रौ कष्टम् अनुभवन्ति। छात्राणाम् अध्ययने विक्षेपः जायते। स्फोटकैः दाहभयं वर्तते। कदाचित् अन्येषां गृहाणि वा वस्तूनि प्रज्वलन्ति। पक्षिणः पीडाम् अनुभवन्ति।' इति।

**विद्याधरः** - त्वं सत्यं कथयसि। स्फोटकैः उत्पादितः धूमः श्वासरोगान् जनयति। इदानी त्वम् एव वद त्वं किम् इच्छसि अस्यां दीपावल्याम्?

**किरातः** - तात! अस्माकं प्रतिवेशी भद्रेशः अपि बालकः अस्ति। तस्य पिता कोरोनाकाले दिवं गतः अस्ति। तस्य कृते नूतनानि वस्त्राणि, मिष्टान्नम्, उपायनम् च क्रेतुम् मे इच्छा वर्तते।

**विद्याधरः** - साधु किरात! साधु। त्वं ननु मम पुत्रः अस्ति।

**किरातः** - यथा अस्माकं गृहे दीपावली आगच्छति तथैव भद्रेशस्य गृहे अपि दीपावली आगच्छेत्।

**विद्याधरः** - सर्वे सुखिनः भवन्तु। दीपावली सर्वत्र भवतु।

**-८, राजतिलक बंगलोज,**
**आबादनगरम् बसस्थानकं पार्श्वे,**
**बोपल, अहमदाबादः-३८००५८**

# 'अनधिकार चेष्टा कदापि श्रेयस्करं न भवति'

**-मोती प्रसाद साहू**

एकस्मिन् ग्रामे एका प्रौढ़ा निवसति स्म। तस्या: कोऽपि रक्तसम्बधिन: नासीत्। विचारशीला सा उचितानुचितयो: भेदे निष्णाता, व्यवहारे प्रगल्भा, प्रकृत्या धार्मिका: चासीत्। सामाजिककार्येषु, परामर्शेषु अग्रे-अग्रे चलति। ग्रामवासिन: तां सम्मानेन 'पितृस्वसा' इति संज्ञया सम्बोधयन्ति। स्त्रीय: स्वपतिनां अपेक्षया तया सह आपणं गन्तुं सुकर: मन्यन्ते। तासां मनसि धारणा आसीत् यत् पितृस्वसया सह कोऽपि आपणिक:, वञ्चक: च वञ्चने समर्थ: न भविष्यति।

पितृस्वसा भूमिहीना आसीत्। आजीविकायै एका धेनु: तया पालिता। धेनो: दुग्धं विक्रीय प्राप्तै: पणकै: गृहादिसामग्री खाद्यपदार्थानि च क्रयति। ग्रामीणा: धेनो: गोमयं उर्वरकाय स्वक्षेत्रं नयन्ति विनिमये तृणानि पराल्यादय: ददति स्म।

एकदा विथिकायां इतस्तत: परिभ्रमन् एका शिशुविडाली दुग्धरोटिकादि प्रदानेन तया सहैव निवासं आरब्धवती। स्वामिनी यदा गृहाभ्यान्तरे कार्ये संलग्ना जाता बहुधा विडाली आसंदिकायां, विश्रामकाले स्वामिन्या: क्रोड़े च उपविशति स्म। गृहात् बहि: तस्या: अग्रे-अग्रे सुरक्षाप्रहरीव चलति।

काचिद् समयान्तराले पितृस्वसा नवजात् किंतु अध्वरे स्थापिता परित्यक्ता एकां कन्यकां प्रति दयालु: भूत्वा पालनार्थं गृहम् आनीतवती। पितृस्वसा तां कन्यकां दुहिता इव स्नेहं करोति स्म। मल-मूत्रं प्रक्षालयति, अंके निधाय गोदुग्धं पाययति, स्नापयति, सज्जीकरोति च।

पूर्वे तस्या: गृहे तया सह केवलं विडाली एव आसीत्। सा एव पितृस्वसाया: प्रेमभाजनं भवति।

अनेन क्रमेण एकदा पितृस्वसा शीते सूर्यातपे उपविश्य तां कन्यकां दुग्धं पाययति स्म। विडाली तयो: सम्मुखं काचिदन्तराले उपविष्य ध्यानेन एतत् सर्वं पश्यति स्म। मनसि अचिन्तयत् यदि इयं बालिका न भवति तत् सम्प्रति स्वामिन्या: अंके अहमेव आसम्।

पितृस्वसया विडालिकाया: मन्तव्यं शीघ्रं पठितम्। एतस्यां मनसि दुर्भावना प्रविष्टा। गृहे अस्या: उपस्थिति: शुभावहा न इति अमन्यत्। समीपस्था एकां सम्मर्जनीं उत्थाय तस्या: उपरि क्रोधेन अक्षिपत्।

विडाली स्वं प्रति स्वामिन्या: एतादृशं क्रोधं एतत् पूर्वं कदापि न पश्यति स्म। सा गृहात् शीघ्रातिशीघ्र पलायने एव स्व कल्याणं अमन्यत्। अनधिकार चेष्टा कदापि श्रेयस्करं न भवति।

**सेवा निवृत्त, प्रवक्ता**
**जी.एस.सिजवाली भवनम्**
**तल्ला चीनाखान, धारानौला**
**अल्मोड़ा-२६३६०१**

# वसन्तपञ्चमी

-डॉ. धनंजयकुमारमिश्रः

माघमासस्य शुक्ले पक्षे या पञ्चमी तिथिः भवति, सा वसन्तपञ्चमी श्रीपञ्चमी वा कथ्यते। अस्यां तिथौ सर्वासु शिक्षा-संस्थासु विद्यानुरागिणां गृहे च सरस्वतीपूजनोत्सवः विधीयते। 'वसन्तपञ्चमी' 'सरस्वती-पूजा' इति नाम्ना प्रसिद्धा अस्ति भारतवर्षे।

सरस्वती = वागधिष्ठात्री देवी। पूजा = आराधाना। सरस्वत्याः पूजा = सरस्वती-पूजा।

सरः (ज्ञान स्रोतः) अस्ति अस्याः इत्यर्थे 'सरस्' शब्दात् 'मतुप्' - प्रत्यये कृते मतुबन्धात् स्त्रीत्वविवक्षायाम् (उगितश्च इति सूत्रात्) ङीपि 'सरस्वती' शब्दः निष्पद्यते।

'सरस्वती' शब्दस्य प्रयोगः नद्यर्थे आसीत्। यथा-गंगा-यमुना-सरस्वती। किन्तु विद्यादेव्यर्थे अपि अस्य प्रयोगः ऋग्वेद-कालादेव प्रसिद्धिं गतः। देवी सरस्वती विद्यायाः अधिष्ठात्री देवी विद्यते। एषा देवी न केवलं विद्यायाः एव अपितु संगीतादिमधुरकलानामपि अधिष्ठात्री देवी अस्ति। अतएव इयं देवी वीणा-पुस्तकधारिणी कथ्यते।

**''शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं**
**वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम्।**
**हस्ते स्फाटिकमालिकां च विदधतीं पद्मासने संस्थितां**
**वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शरदाम्॥''**

अस्याः देव्याः प्रभावेण मानवेषु सत्यासत्य-निर्णये नीर-क्षीर-विवेकिनी बुद्धिः जागर्ति इति दर्शयितुं नीर-क्षीर-विवेकी हंसः तस्याः वाहनम्। ब्रह्मा-विष्णु-महेशादयः देवाः स्तुतिं कुर्वन्ति देविसरस्वत्याः। सा देवी जाड्यां अपहरति, सा कुन्देन्दुतुषारहारधवला अस्ति। शुभ्रवस्त्रवृता अस्ति। श्वेतपद्मासना अस्ति। वीणावरदण्डमण्डितकरा चास्ति। उक्तं च -

**'' या कुन्देन्दुतुषारहारधावला या शुभ्रवस्त्रावृता**
**या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।**
**या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता**
**सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा॥''**

माता सरस्वती अपूर्वा सुन्दरी अस्ति। सा जगद्व्यापिनी अस्ति। विरञ्चिहरीशवन्द्या अस्ति। शारदाम्भोजवदना अस्ति। सर्वे आराधकाः ताम् नमन्ति -

**''आशासुराशीभवदङ्गवल्ली**

**भासैव दासीकृतदुग्धसिन्धुम्।**

**मन्दस्मितैर्निन्दितशारदेन्दुं**

**वन्देऽरविन्दासनसुन्दरि त्वाम्॥''**

अथ च,

**'शारदा शारदाम्भोजवदना वदनाम्बुजे।**

**सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात्॥''**

भगवती सरस्वती 'भारती' नाम्ना एव प्रसिद्धा। तस्या: कोश: अपूर्व:। व्ययत: तस्या: कोशे वृद्धिं आयाति। सञ्चयात् नष्टम् भवति। उक्तं च –

**'' अपूर्व: कोऽपि कोषोऽयं विद्यते तव भारति।**

**व्ययत: वृद्धिमायाति क्षयमायाति सञ्चयात्॥''**

वसन्तपंचम्या: एव दिने ज्ञानमयेन तृतीयेन नेत्रेण भगवान् शंकर: कामदेवं भस्मावशेषं कृतवान् आसीत्। वसन्तपंचम्याम् एव सर्वप्रथमम् आदिकवे: वाल्मीके: मुखात् कवित्वमयी वाणी (सरस्वती) प्रादुर्भूता आसीत् –

**''मा निषाद्! प्रतिष्ठां त्वमगम: शाश्वती: समा:।**

**यत् क्रौञ्चमिथुनादेकमवधी: काममोहितम्॥''**

अतएव विद्यादीनां प्राप्तये अस्मिन् पर्वणि भगवत्या: सरस्वत्या: देव्या: पूजा कर्तव्या एव।

सरस्वत्या: औपचारिकी वार्षिकी पूजा अज्ञातचिरकालात् भारते प्रचलिता वर्तते। मकरस्थे रवौ माघे मासे शुचौ पक्षे पंचम्यां सरस्वत्या: पूजा प्रत्यब्दम् अनुष्ठीयते।

कतिपुचन वैयक्तिक-सद्मसु, बालविद्यालयेषु, मध्य-विद्यालयेषुउच्चविद्यालय-महाविद्यालय-विश्वविद्यालयच्छात्रावासादिषु अस्या: पूजा महता वैभवेन, विविधनृत्य-गीत-वाद्यादिभि: प्रभूतै: फलाद्युपहारैश्च आचर्यते। अनेके जना: आमन्त्र्यन्ते। सरस्वत्या: मृण्मयीं प्रतिमां प्रतिष्ठाप्य चित्रं वा संस्थाप्य शास्त्रोक्तविधिना पूजाविधीयते। उपासका: स्तवै: देवीं पुष्प-स्तकवैश्च सम्मानयन्ति। मध्याह्नात् परं प्रसाद-वितरणेन गीत-नृत्यादिभिश्च समयोऽतीव शोभासम्पन्नो विधीयते। निशामुखे स्तुत्यादय: क्रियन्ते, तदनु च अनेकत्र अनेकानि रूपकाणि अभिनीयन्ते। अपरेद्यु: विसर्जनं कृत्वा प्रतिमाया: जल-प्रवाह: क्रियते।

अद्यत्वे पूजाया: रूपम् बहुत्र विकृतम् संजातमस्ति। विविधाडम्बरै: पूजाया: वास्तविकं रूपम् आच्छन्नं कृतम् भवति। यत्र-तत्र अश्लीला अपि व्यवहारा: पूजावसर-प्रतीपा: भवन्ति इति श्रूयते। तदेतत् दु:खावहनम् अवगमनीयम् पूजाविधि: एतावता दूषित: क्रियते। लोकानां गतानुगतित्वात् एष एव पूजाविधिरिति दु:खदो भ्रम: पाल्यते। एतेन शिशव: कुसंस्कारपात्रतां नीयन्ते।

वस्तुतः सरस्वती वाणी–रूपा। अतः समस्त वाङ्मयं तस्याः स्वरूपम्। अतः प्रतिदिनं विद्याभ्यासो मनोयोगेन करणीयम्। वसन्तपंचमी तु सस्वत्याः वार्षिकं पूजनम्। पूजा परम्परा सरस्वती–देवी–चरणानुचिन्तन–प्रधाना संरक्षणीया। वसन्ते नवयौवनं दृश्यते। यौवनस्य आवश्यकता अस्ति सम्यक् दिक्। देवी सरस्वतीम् सम्पूज्य वयं नीर–क्षीर–विवेकं कर्तुम् शक्नुयाम। सा देवी अस्मान् अज्ञानता–अपराधं च अपाकरोति –

**''मत्समः पातकी नास्ति पापाघ्नि त्वत् समा न हि।**
**एवं ज्ञात्वा महादेवि! यथा योग्यं तथा कुरु॥''**

॥ इति॥

**–विभागाध्यक्षः, संस्कृत**
**सि.का.मु.वि.वि. दुमका**
**झारखण्डः**

# चातुर्यं भिन्नसन्धाने

**-ओम प्रकाश ठाकुरः**

विजयनगरराज्यस्य प्रतिवेशि-राज्येन सह वैमनस्यं प्रचलद् आसीत्। ईदृशे व्यतिकरे तेनालीरामस्य विरोधिनः कृष्णदेवरायं प्रोत्साह्य तेनालीरामं पराभवितुम् अवसरं प्रतीक्षन्ते स्म।

एकस्मिन् दिने यदा नृपः निजोद्याने स्थितः प्रतिवेशिराज्यस्य समस्याया निदाने विचारमग्न आसीत्, तदा कश्चित् सभासद् इतस्ततो निपुणं निरीक्षमाणः भूपतिमुपगम्य सम्भ्रान्त इव शनैर्बभाषे महाराज! अपि श्रुतं भवता तेनालीरामस्य विषये। भूपतिः शङ्कितमनाः ससम्भ्रमं पृष्टवान्- किमभवत् तस्य, शीघ्रं ब्रूहि।

सोऽवदत् - अन्नदातः। क्षम्यताम्, अभयदानं बिना कथं ब्रूयाम्? भूपालस्तम् आश्वासयन् उवाच, संकोचं परिहाय निर्भयं कथयेः का वार्ता इति।

सभासत् कथयामास राजन्! तेनालीरामस्य प्रतिवेशिना राज्येन सम्पर्कोऽस्ति। सोऽस्मत्सम्बन्धस्य विघटनं चिकीर्षति।

कृष्णदेवः तदाकर्ण्य उत्तेजितः कुपितश्च भूत्वाऽवदत्- किमिदम् अनर्गलं जल्पसि? स उवाच- अहन्तु पूर्वमेव अजानाम् यत् तेनालीरामस्य वाग्जालेन वशीकृतो भवान् तद्विषये किमपि न श्रोष्यति। भूपालोऽभ्यभाषत-अहं सम्यग् जानामि स प्रामाणिकः निष्ठावांश्च। स कथमपि राज्यस्य अनिष्टं न विधास्यति। त्वया यत् श्रुतं तदलीकम्। सभासदुक्तवान्-महाराज! यावन्तं विश्वासं भवान् तेनालीरामे विधत्ते, तस्मादप्यधिकमहम् अस्यां सूचनायां करोमि। स्वयं सम्यक्तया निरीक्ष्य परीक्ष्य च मयाऽयम् उदन्तो भवते निवेदितः।

तस्यैतया बलीयस्या उक्त्या नृपस्तद्विषये विचारयितुं विवशोऽजायत अवदत् च त्वमितो याहि। अहं विमृशामि। यदि सोऽस्मिन् विषये दोषभाक, नूनं कठोरं दण्डं लप्स्यते। इत्याकर्ण्य मुदितमनाः सभासद् गृहं प्रययौ।

**यथार्थं किं, न जानन्ति**
**राजानश्चारचक्षुषः।**
**अतस्ते विश्वसन्त्येव**
**वचस्यासन्नवर्तिनाम्॥**
**असत्यं सत्यवद् भाति**
**भूयोभूय उदीरितम्।**
**बुधानामपि चेतांसि**
**यान्ति तेन कषायताम्॥**

अपरेद्युः भूपती रहसि तेनालीरामम् आकार्य तमवदत् यन्मया श्रुतं, त्वं प्रतिवेशिना भूपतिना साकं किमपि सन्धानं कृत्वा मह्यं दुह्यसि। महीपतेरिमम् आरोपं निशम्य असौ आपादमस्तकम् अवेपत। किं ब्रूयाम् इति निर्णेतुं नाशक्नोत्।

तं धृतमौनमालक्ष्य भूपो रोषारुणनयनः अगर्जत्- किं त्वदीयं मौनम् अपराधस्य स्वीकृतेर्लक्षणं नास्ति? तच्छ्रुत्वा साश्रुनयनः तेनालीरामोऽवदत्, मया कदापि भवद्वचसः प्रतिवादो न कृतः, न च भविष्ये विधास्ये।

तस्येदं वचनम् अनले घृतमिव राज्ञो मानसं सन्दीपयामास। अविलम्बमेव भूपः समादिशत्, तमेव शरणं गच्छ, येन साकं कृतसन्धानोऽसि। परिजहीहि मदीयं राज्यम्।

तेनालीरामोऽवदत् - एतावतो महापराधस्य इयान् अल्पीयान् दण्डः?

राज्ञा प्रोक्तं, त्वदीयां सेवां, मैत्रीसम्बन्धं, तावकं पदगरिमाणं च विलोकयन् अहम् इयन्तम् एव दण्डं ददामि। अपरेण केनापि चेदीदृशोऽपराध आचरितोऽभविष्यत् तर्हि तस्य देहं खण्डशः अकरिष्यम्।

राजादेशं निशम्य तेनालीरामः प्रतिवादम् अकृत्वैव नतमूर्धा ततोनिर्गतः।

**वचो यत्प्रोच्यतेऽकाले**
**न भवेत् तच्छुभावहम्।**
**बीजमुप्तमकाले यत्**
**क्षेत्र एव विनश्यति ॥**

यदाऽग्रिमे दिवसे सभासद्भिः तेनालीरामस्य राज्यपरित्यागवार्ताऽऽकर्णिता, सरिति जलप्लाव इव तेषाम् उल्लासः हृदि न माति स्म। ते सर्वे राजनि स्वप्रभावं वर्धयितुकामाः पदोन्नतिं च समीहमाना विविध-कल्पना-सन्तति- प्रवाहे नीयमानाना इव आत्मानम् नियन्तुं न शेकिरे।

**परिभवे गुणिनामतुलं मुदं**
**दधति हन्त सुनीचकुलोद्भवाः।**
**अनुभवन्ति सुखं मलिने जले**
**प्रपतिताः गर्तेषु हि शूकराः ॥**

तेनालीरामः विजयनगरस्य शत्रोः राजधानीं प्राप्य राजानमुपगतः, छन्दोबद्धस्तुत्या च तं तुष्टाव। स्वां प्रशंसामाकर्ण्य पुलकितः सन् नृपतिस्तं तस्य परिचयं पृष्टवान्। तेनोक्तं यदहं विजयनगर-राज्यस्य नीतिसचिवः तेनालीरामोऽस्मि।

पूर्वमेव श्रुत-तेनालीरामगुण-कीर्तिः नृपतिः अनेकधा तस्य सम्भावनामकार्षीत् अब्रवीत् च-भो तेनालीराम! कृष्णदेवरायः अस्मान् शत्रून् मन्यते त्वं च तस्य नीतिसचिवः निर्भयमत्र राजसभायां समागतवान्। शत्रुराज्ये तु तव किमपि अनिन्टं भवितुमर्हति।

तेनालीरामः स्मित्वाऽभाषत राजन्! भवान् विद्वान्, अतुलशक्तिसम्पन्नः, प्रजाहितचिन्तकः सुयोग्यः प्रशासकश्च। अस्माकं महाराजोऽपि एतादृशानां गुणानां निधानम्। असौ भवन्तं सुहृदं मन्यते न तु रिपुम्। भवतोऽस्या भ्रान्ते र्निवारणायैव अहं भवत्सकाशं प्रेषितोऽस्मि ।

किं कृष्णदेवरायोऽस्माकं मित्रम् इति ससम्भ्रमं भाषमाणो नृपः पुनरवदत् भो! सोऽस्मान् प्रति वैरभावं दधानः आक्रमितमीहते इत्यावेदितमस्मद् गुप्तचरैः। एतन्निशम्य तेनालीरामो गम्भीर स्वरेणोवाच-महीपते! अस्मद् गूढचारिणोऽपि भवद् विषये एवमालपन्ति। एतां भ्रान्तिमपासितुमेव अहं महाराजेन भवदभ्यो पार्श्वे प्रेषितोऽस्मि।

किं युद्ध कस्यचित् कल्याणाय कल्पते? इदन्तु भूयसीं धनजनहानिं कृत्वा विनाशमेव तनुते। भवान् कृष्णदेवरायश्च उभौ बुद्धिमन्तौ। भवतोर्मध्ये सङ्गरो न शोभते।

तद्वचसा सान्त्वनामाप्य भूपोऽब्रवीत्-अहमपि युद्धं न चिकीर्षामि, परं कथमिदं प्रमाणितं स्यात् यत् कृष्णदेवः मैत्रीं कामयते। तेनालीरामः प्रतिवचनं ददौ यद् भवान् श्वः एव एकं प्रणिधिं सोपहारं ससन्धिपत्रं अस्मद् भूपतेः सकाशे प्रहिणोतु। अहमपि निजमेकं पत्रं सन्देशहराय दास्यामि। यदि भवत्प्रेषितोपहारः स्वीक्रियते तदा स मैत्रीसम्बन्धमभिलषतीति अवधार्यताम्। यद्यसौ उपहारं न स्वीकारोति तदाऽहं दण्डमर्हामि।

राजाऽवोचत्- त्वद्वचनं साधु मन्ये किन्तु मत्पक्षतः सन्धि-पत्रं चेत्प्रेष्यते, तदा ममैव लाघवं सिध्यति।

तेनालीरामो गम्भीर-गिरा निजगाद राजन्! सन्धि-प्रस्तावमादाय अहं स्वयमेव भवत्समीपम् आगतोऽस्मि। अस्मद् राज्यस्य पक्षतः एव अयं प्रथमः उपक्रमः।

सर्वं गुणागुणं परिज्ञाय महीभृता अग्रिमे दिने वहुमूल्योपहारैः सहितः विशिष्टः प्रणिधिः विजयनगरं प्रति प्रेषितः।

अस्मिन् अन्तराले कृष्णदेवोऽपि तेनालीरामस्य निर्दोषतां तद्विरोधिनां समासदां च षड्यन्त्रं सम्यग् अवागच्छत्।

शत्रुराज्यात् सोपहारे प्रणिधौ प्राप्ते भूपालः भृशं मोदमवाप। असौ हृदयेन तेनालीरामम् अभिनन्दन् उपहारैः सहितं स्व-मन्त्रिणं तेन राजदूतेन सह शत्रुराज्यं प्रेषितवान्। राजानं प्रति प्रेपिते पत्रे तेन तेनालीरामस्य त्वरितप्रेषणाय निवेदनमपि कृतमासीत्।

**क्षणे रुष्टाः क्षणे तुष्टा**
**भूपाः प्रोत्साहिताः परैः।**
**कदा किं ते विधास्यन्ति**
**केऽपि नैतद् विजानते ॥**

यदा तेनालीरामः विजयनगरं प्रत्यागच्छत्, भूपः तस्य विशेषेण अभिनन्दनं विधाय विशिष्टैरुपहारैस्तं सम्मानितवान्।

यैः सभासद्भिः तद्विरुद्धं कपट-योजना कृताऽऽसीत् ते लज्जिता भूत्वा अन्वतप्यन्त।

**मिथो वैरं समुत्पाद्य**
**मूक-दर्शक-भूमिकाः।**
**सुलभाः किन्तु भिन्नानां**
**सन्धाता तु क्वचित् क्वचित्।**

# संस्कृतम् वैदिकं स्याद् अथवा लैकिकं

**-मनोज कुमार डिमरी**

संस्कृतसाहित्यस्य सुमहती गौरवशालिनी परम्परेयं वैदिककालान्निरन्तरम् अव्याहतगत्या च प्रवहमाना वर्तते। वैदिकवाङ्मयस्य अवलम्बनं विधाय लौकिकसाहित्यं प्रवर्तितं भवति। निखिलस्य विश्वस्य प्राचीनतमं साहित्यं वेद इति विदुषां काव्याकाराणां वा मतमस्ति। वस्तुतः निखिलविश्वस्य विचार-विनियमः भाषामाध्यमेन भवति। यदि वयं विशुद्धभाषायाः विषये चिन्तयामश्चेत् तर्हि सपदि संस्कृतभाषा मुखे आयाति। काव्यादर्शकारः कथयति-

**इह शिष्टानुषिष्टानां शिष्टानामपि सर्वथा ।**
**वाचामेव प्रसादेन लोकयात्रा प्रवर्त्तते ॥''**

संस्कृतं वैदिकं स्याद् अथवा लौकिकं स्यात्। संस्कृतस्य सम्पूर्ण वाङ्मयं समाजस्य मानवस्य वा पथप्रदर्शनं करोति। वस्तुतः साहित्यस्य सर्वप्रथममुत्पत्तिः कदा केन माध्यमेन अभवत्? तथा साहित्यस्य विकासक्रमः कीदृशः? सुप्रसिद्धैराचार्यैः कस्मिन् समये तत्तद् सिद्धान्तनिरूपणमकारि? सम्प्रदायानां प्रवर्तनं केन प्रकारेण अभवत् इत्यादि विषये विवेचनं कर्तुं प्रथमं कालस्य विभागनिर्धारणमावश्यकं भवति। वेदाः सर्वविद्यानां मूलस्रोतरूपेण विद्यन्ते। एवं प्रकारेण पुराणकाव्यं चापि पंचमवेदस्य संज्ञा वर्तते। वैदिकग्रन्थेषु येषां विषयाणां निरूपणं सूक्ष्मरूपेण दृश्यते, तेषां विषयाणां प्रकाशनं बृहद्रूपेण पुराणसाहित्ये दृश्यते। पुराणसाहित्यं वेदार्थस्य उपबृंहणं परिपुष्टं वा करोति।

वस्तुतः वैदिकसाहित्यं पुरात्तनज्ञान-विज्ञानस्य च आकरः वर्तते। यथा वैदिकसाहित्ये ब्रह्मसम्बन्धिविषयाः, देवसम्बन्धिविषयाः,सृष्टिसम्बन्धिविषयाः, ब्रह्माण्डसम्बन्धिविषयाः, ज्योतिपसम्बन्धिविषयाः, गणितसम्बन्धि-विषयाः, रसायन-सम्बन्धिविषयाः, औषधिसम्बन्धिविषयाः, प्रकृतिसम्बन्धिविषयाः, खगोलसम्बन्धिविषयाः, भूगोलसम्बन्धि विषयाः, धर्मशास्त्रसम्बन्धिविषयाः, इतिहाससम्बन्धिविषयाः, लोकाचार-सम्बन्धिविषयाः, सम्वाद-सूक्त सम्बन्धिविषयाश्च प्रकाशिताः सन्ति, तथैव पौराणिक-साहित्येऽपि सृष्टिसम्बन्धिविषयान् विधाय विविधाः उपरोक्तविषयाः निरूपिताः सन्ति। पौराणिकसाहित्ये वेदार्थस्य उपबृंहणमस्ति। तथ्यमिदं महाभारतकारः सुस्पष्टरूपेण कथयति-

**पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः।**

अर्थात् पुराणभूतेन पूर्णचन्द्रेण वेदभूता ज्योत्स्ना प्रकाशिता कृतास्ति। इदानीं जिज्ञासा आयाति यत् सर्वेषां विषयाणां निरूपणं यदि वैदिके साहित्ये वर्तते चेत्तर्हि पौराणिकसाहित्यस्यावश्यकता किमर्थमभवत्? जिज्ञासामिमां शान्तं कर्तुं महाभारतकारः कथयति-यत् वेदार्थम् अत्यन्तं क्लिष्टं, गूढार्थयुक्तं च वर्तते। अतः अस्य रहस्योद्-घाटनाय पुराणसाहित्यं विनिर्मितमस्ति-

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।**
**बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति ॥**

अतः बिभेत्यल्पश्रुताद् इति विषयस्य अनुसन्धानं विधाय पुराणकारः पौराणिकसाहित्यस्य रचनां कृतवान्। सामान्यरूपेण वेदस्थानां मन्त्राणां सिद्धान्तानां, तथ्यानां प्रतिपादनं पुराणेषु श्लोकरूपेण विद्यते। उदाहरणार्थं भागवतकारः भागवतं वेदभूतस्य कल्पवृक्षस्य गलितं सुपरिपक्वं मधुरतमं फलं स्वीकरोति।

वैदिकसाहित्यस्थानां आख्यानानां विशदवर्णनं पौराणिकसाहित्ये दरीदृश्यते। वैदिकसाहित्ये पदानां यथा निरूपणं वर्तते, तथैव पौराणिकसाहित्येऽपि। उदाहरणार्थम्-विष्णुपुराण-ब्रह्मपुराण-पद्मपुराणेषु विष्णुपदाय उरुगाय उरुक्रम-पदप्रयोगो प्राप्यते। पुराणसाहित्ये वैदिकमन्त्राणां उपनिषद्-मन्त्राणां च बहुशः व्याख्यां द्रष्टुं शक्यते। यथा-**द्वा सुपर्णा सयुजा सखाया** इति वैदिकमन्त्रस्य व्याख्या भागवते वायुपुराणे च, **ऊँ तत् सवितुर्वरेण्यम् इति** गायत्रीमन्त्रस्य व्याख्या अग्निपुराणे, **चत्वारि शृङ्गा त्रयोऽस्य पादाः** इति वैदिकमन्त्रस्य व्याख्या स्कन्दपुराणे, भागवतपुराणे च द्रष्टुं शक्यते।

ब्राह्मणग्रन्थस्थानां वाक्यानां व्याख्या पौराणिकसाहित्ये सम्प्राप्यते। त्र्यम्बकं यजामहे अस्य वैदिकमन्त्रस्य प्रयोगः लिङ्गपुराणे बारद्वयं समागतं वर्तते। अतः निष्कर्षरूपेण कथयितुं शक्यते यत् पुराणकारः पुराणेषु वेदस्थानां मन्त्राणां वैशद्येन प्रतिपादनं करोति। पुराणेषु वैदिकमन्त्राणां सरलीकरणं विद्यते। वस्तुतः वेदस्थाः मन्त्राः दुरूह-क्लिष्टाश्च विद्यन्ते, परन्तु त एव मन्त्राः पौराणिकसाहित्ये सरलतया निर्दिष्टाः विद्यन्ते। यदि पौराणिक साहित्यं न भवति स्म, तदा वैदिकसाहित्यस्य रहस्योद्घाटनमसम्भवं आसीत्।

वैदिकसाहित्यस्य संहिता-ब्राह्मणभागयोः नैकानां आख्यानानां पदे पदे (स्थाने स्थाने वा) नैकानां देवानां स्वरूपविवेचनं मिलति। वेदाख्यानस्य पर्याप्तमुपबृंहणं पुराणसाहित्ये सम्प्राप्यते। वैदिक-आख्यानस्य निरूपणं द्विधा प्रकारेण कर्तुं शक्यतेलौकिकमाख्यानं धार्मिकमाख्यानं च। धार्मिकेषु आख्यानेषु प्रजापतेः विष्णोश्च नैकस्वरूपयोः वर्णनं बहुधारूपेण सम्मिलति किन्तु लौकिकाख्यानेषु कस्यचित् राज्ञः वृत्तनिरूपणं, ऋषिचरित्रनिरूपणमथवा कस्यचिदलौकिकस्य लोकरंजनप्रणयकथायाः संक्षिप्तं विस्तृतं वा प्रतिपादनं दृश्यते। वैदिकसाहित्यस्य सूक्ष्मविवेच-नस्य विशदस्वरूपं पौराणिकसाहित्ये दृश्यते। वेदेषु प्रजापतेः नैकस्वरूपधारणस्योल्लेखः सम्मिलति, तथा पुराणेषु अवतारवादसिद्धान्तस्य सम्पुष्टिः नैकासु कथासु प्राप्यते। उदाहरणार्थम्-प्रतिपतेः मत्स्यावतारधारणस्याख्यानं शतपथब्राह्मणे संक्षेपरूपेण मिलति, परन्तु भागवतपुराणे, अग्निपुराणे, गरुड्पुराणे, पद्मपुराणे, मत्स्यपुराणे वा प्रस्तुतस्य आख्यानस्य वर्णनं अवतारप्रसंगे सम्प्राप्यते। एवं प्रकारेण कूर्माख्यानस्य स्वरूपविवेचन तैत्तिरीय-आरण्यके, शतपथब्राह्मणे, जैमिनीयब्राह्मणे च संक्षिप्तरूपेण समुपलभ्यते, किन्तु भागवतपुराणे, कूर्मपुराणे, अग्निपुराणे, गरुडपुराणे, पद्मपुराणे, ब्रह्मपुराणे, विष्णुपुराणे च प्रस्तुतस्य कूर्मावतारस्य विशदविवेचन मिलति। ऋग्वेदस्य सूक्तिषु उरुगाय, त्रिविक्रमपदप्रयोगः विष्णवे वर्तते। शतपथब्राह्मणग्रन्थे वामनेन विजितस्याः धरायाः वर्णनं सूक्ष्मरूपेण दृश्यते, परन्तु अस्याः घटनायाः निरूपणं पौराणिकसाहित्ये सर्वत्र प्राप्यते। वामनपुराणस्य नामकरणन्तु प्रस्तुतां कथामभिलक्ष्य कृतमस्ति। पुरूरवा-उर्वशीसम्वादस्य आख्यानं ऋग्वेदस्य प्रख्यातेषु आख्या-नेष्वन्यतमो वर्तते। मूलरूपेण अस्य क्रमः स्वल्पकाये आसीत्, परन्तु पौराणिकसाहित्ये अस्याः कथायाः उपबृंहणं वैशद्येन समुपलभ्यते। यथा विष्णुपुराणस्य चन्द्रवंशनिरूपणप्रसंगे पुरूरवा-उर्वशीसंवादः वैशद्येन विवेचितो वर्तते एवं प्रकारेण वैदिकसाहित्ये हरिश्चन्द्र-शुनः शेपाख्यान-नाचिकेतोपाख्यान-अहिल्यायै जारतारापतिष्चन्द्रमा-विश्वरूपं जघानेन्द्र-ब्रह्मा स्वर्दुहितुः पति-इत्यादीनामाख्यानानां स्वरूपवर्णनं दृश्यते।

वैदिकसाहित्ये नानाप्रकारकानां भौतिकविषयसम्बद्धानां आध्यात्मिक-कथानकानां स्वरूपं द्रष्टुं शक्यते। पौराणिकसाहित्ये रामायणमहाभारतमहाकाव्यग्रन्थेषु वा उपरोक्तं वैदिकसम्बद्धं कथानकं कुत्रचित् संक्षेपरूपेण कुत्रचिच्च बृहद्रूपेण सम्प्राप्यते।

पुराणसम्बद्धसाहित्ये मुख्यरूपेण पुराणं पंच लक्षणम् इत्यस्य प्रतिपादनमस्ति, परञ्च पौराणिकसाहित्ये पुराणे पंच लक्षणम् विधाय नैकानां विषयाणां स्वरूपनिरूपणं प्राप्यते। एतत् सत्यमस्ति यत् पौराणिकसाहित्ये सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरितक्रमश्च वैशद्येन विवेचितो वर्तते, तथापि धर्मशास्त्रीयनियमानां प्रतिपादन, तीर्थमाहात्म्यवर्णनं, राजधर्मविवेचनं, पुराणस्थस्य विज्ञानस्य स्वरूपनिरूपणं, वास्तुविद्यानिरूपणं, धनुर्विद्या-प्रतिपादनं, परापराविद्याप्रकाशनं, भूगोलसम्बद्धं विवेचनं, गोलसम्बद्धं विषयनिरूपणं, ब्रह्माण्डे चतुर्दश लोकविपय-विवेचनं च सूक्ष्म-बृहद्रीत्या वर्तते।

पौराणिकसाहित्ये नवविधा सृष्टिः निरूपिता वर्तते। नवविधस्य सृष्टेः संक्षिप्तस्वरूपमत्र निरूप्यते। वस्तुतः सर्गप्रक्रिया प्राकृत-वैकृत-प्राकृतवैकृतभेदेन त्रिधा वर्तते। प्राकृतसर्गः अबुद्धिपूर्वको भवति, अथवा इयं सृष्टिः नैसर्गिकी भवति। वैकृतसर्गः बुद्धिपूर्वको भवति-

**प्राकृताश्च त्रये पूर्वे सर्गास्तेऽबुद्धिपूर्वकाः ।**
**बुद्धिपूर्व प्रवर्तन्ते मुख्याद्याः पंच वैकृताः ॥**

प्राकृतसर्गस्य त्रिषु सर्गेपु ब्रह्मसर्ग-भूतसर्ग-वैकारिकसर्गाश्च विद्यन्ते। महत्तत्त्वस्य सृष्टिः ब्रह्मसर्गः, पंचतन्मात्राणां सृष्टिः भूतसृष्टिः, इन्द्रियसम्बद्धा सृष्टिः वैकारिकी सृष्टिश्च कथ्यते। वैकृतसर्गस्य पंच सर्गेषु मुख्यसर्ग-तिर्यक्सर्ग-देवसर्ग-मानुपसर्ग- अनुग्रहसर्गाश्च विद्यन्ते। मुख्यसर्गः आरम्भिकी सृष्टिः (जड़सृष्टिः अर्थात् वृक्षादिसृष्टिः) ,तिर्यक्सर्गस्य सृष्टिः तिर्यक्जीवानां सृष्टिः, (पशु-पक्षिणां सृष्टिः), देवसर्गे प्रकाशपुंजयुक्त- देवानां सृष्टिः, मानुषसर्गे भ्रमणशीलानां सत्त्व-रज-तमयुक्तानां प्राणिनां सृष्टिः, अनुग्रहसर्गे च विपर्यय-सिद्धि-शान्ति-तुष्टिश्च वर्तन्ते। अन्तिमः नवमः सर्गः कौमारसर्गो विद्यते।

प्राणिसृष्ट्यां असुराः सुराः, पितरः, मनुष्याः प्रमुखाश्च सन्ति। तमोगुणप्राधान्यादद् असुराणामुत्पत्तिः, सत्त्वगुणप्राधान्यात् सुराणामुत्पत्तिः, आंशिकसत्त्वमयात् पितृणामुत्पत्तिः रजः प्राधान्यात् मनुष्याणामुत्पत्तिश्च अभवत्। पुनः पौराणिकसाहित्ये ब्राह्मी-मानुषी-रौद्रीसर्गप्रक्रियावर्णनमायाति। ब्राह्मीसृष्ट्यामपि भूः, भुवः स्वः, महः, जनः, तपः, सत्यलोकानां निर्माणप्रक्रियावर्णनं वर्तते। अस्यामेव भृगु-पुलस्त्य-पुलह-क्रतु-अङ्गिरस-मरीचि-दक्ष-अत्रि-वसिष्ठ-नारदादि मानसपुत्राणामुत्पत्तिरभवत्। मानसीसृष्ट्यां कश्यप-निर्मिता देव-दैत्य-पशु-पक्षी-स्थावर-जङ्गम-सृष्टिः समुत्पन्ना अभवत्। रौद्रीसृष्ट्यां रुद्रस्याविर्भावस्य (स्त्रीपुरुषस्य) वर्णनमायाति। प्रतिसर्गे नैमित्तिक- प्राकृत-आत्यान्तिक-नित्यप्रलयस्य वर्णनं वर्तते। पुनः मन्वन्तरस्य वर्णनमायाति। मन्वन्तरे कालस्य निर्धारणं क्रियते। एकस्य मन्वन्तरस्य कालनिर्धारणं काष्ठा-कला-घटी-मूहूर्त-दिवस-पक्ष-मास-दक्षिणायन-उत्तरायण-वर्ष-दिव्यवर्ष-दिव्य-वर्षसहस्र-सत्य-त्रेता-द्वापर-कलि-चतुर्युग एक-सप्ततिः चतुर्युगेन क्रियते।

वैदिके पौराणिकसाहित्ये च आर्यजातीनामुल्लेखो प्राप्यते। वैदिक-आर्यजातीयाः धार्मिकाः आसन्। आर्याः देवसत्ताविषये दृढविश्वासं कुर्वन्ति स्म। आर्याणां मतमासीत् यत् विश्वमिदं पृथ्वी-अन्तरिक्ष-द्युलोकेषु त्रिषु भागेषु व्याप्तं वर्तते। प्रत्येकस्मिन् लोके देवानां निवासो वर्तते। वैदिकसाहित्ये देवानामाकृतिः मनुष्यवत् वर्तते। वस्तुतः

वेदस्य मुख्यरूपेण द्वौ भागौ स्तः-अनुष्ठानविषयकं कर्मकाण्डम्, ज्ञानविषयकं ज्ञानकाण्डं च। अनुष्ठानविषयक कर्मकाण्डं वेदस्य विशालतम क्षेत्रमस्ति, ज्ञानकाण्डं तदपेक्षया नितान्तमत्यल्पं वर्तते। ज्ञानकाण्डं वैदिकसिद्धान्ता-नामन्तिमा परिणतिः वर्तते अथवा वेदस्यान्तिमो (वेदान्तः) भागो वर्तते। वैदिकसाहित्ये निर्दिष्टं कर्मानुष्ठानमेव योगः कथ्यते-देवतोद्देष्येन द्रव्यत्यागो यागः। निरुक्तकारः यास्कः अस्मिन् प्रसंगे कस्यचित् ब्राह्मणग्रन्थस्य वचनम् उद्धृतं करोति- यस्यै देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायेत् वषट् करिष्यन्।

वस्तुतः एतत् सत्यमस्ति यत् मानवस्य प्रकृत्या सह अभेदसम्बन्धो वर्तते। मानवस्य जीवने येषां वस्तूनामावश्यता भवति, तेषां वस्तूनां पूरणं मानवः प्रकृत्या करोति। यदा मानवः जन्मग्रहणं करोति तत एव मानवः स्वकीयं जीवनं सर्वतः आच्छादितं दृश्यते। प्रातःकालस्य सूर्यबिम्बं दृष्ट्वा रात्रिकालस्य चन्द्रबिम्बं दृष्ट्वा च मानवस्य मनसि कौतूहलमुत्पादयति। कदाचित् मानवः वसन्तस्य सौन्दर्यं पश्यति, कदाचित् वर्षाकालस्य जलं वैद्युतं च अवलोकयति, कदाचित् शीतकालस्य शैत्यमनुभवति, कदाचिच्च मेघस्य गर्जनं श्रृणोति, एतत् सर्वं विलोक्य मानवस्य मनसि काचित् जिज्ञासा समुत्पन्ना भवति, यत् दृश्यमानस्य जगतः नियन्त्रकः कः? मानवः एतत् सर्वं ज्ञातुं स्वकीये मनसि नैकानां देवानां परिकल्पना करोति।

ऋग्वैदिकसाहित्ये बहुदेववादस्य परिकल्पना दृश्यते। वैदिककाले देवानां स्तुतिः मन्त्रैः क्रियते। देवानां संख्यानिर्धारणविषये वेदे पुराणे उभयोः पर्याप्तो मतभेदो दृश्यते। निरुक्तकारः यास्कः निरुक्तशास्त्रानुसारं त्रिलोकस्य प्रत्येकस्मिन् लोके एकैकस्य देवस्य स्थितिनिर्धारणं परिगणयति। उदाहरणार्थम्-पृथिव्यां अग्निः, अन्तरिक्षस्थाने इन्द्रो वायुदेवो वा, दिविस्थाने सूर्यश्च। परन्तु ऋग्वेदस्य प्रथममण्डलस्य १३९ अनुवाकस्य।। मन्त्रसंख्यायां त्रयत्रिंशत् देवानां परिकल्पना द्रष्टुं शक्यते। अत्र एकादश देवाः पृथिवीस्थानीयाः, एकादश देवाः अन्तरिक्षस्थानीयाः, एकादश देवाश्च द्यु-स्थानीयाः सन्ति। यद्यपि ऋग्वेदे देवानां संख्यानिर्धारणं वर्तते, परन्तु तत्र देवानां नामसङ्केतस्य नितरामभावो दृश्यते। त्रयत्रिंशत् देवानां नामानि शतपथब्राह्मणग्रन्थे ८ वसवः, ११ रुद्राः, १२ आदित्याः, १ इन्द्रः, । प्रजापतिश्च। ऋग्वेदस्य दशममण्डलस्य १९९ अनुवाकस्य ।। मन्त्रे त्रयत्रिंशत देवानां संख्यानिर्धारणमेवं प्रकारेण निरूपितं वर्तते-

**ये देवासो दिवि एकादशस्थ पृथिव्यध्येकादशस्थ ।**
**अप्सुक्षितो महिनेकादशस्थ ते देवासो यज्ञमिमं जुषध्वम् ।।**

यद्यपि ऋग्वेदस्य प्रथममण्डलस्य १६४ अनुवाकस्य ४६ मन्त्रे अद्वैततत्त्वस्यापि निरूपणं दृश्यते-एकं सद् विप्रा बहुधा वदन्ति, सुपर्णं विप्रा कवयो वचोभिरेकं, सन्त बहुधा कल्पयन्ति इत्यादिषु वैदिकवाक्येषु एकस्य सद्-देवस्य प्रतिपादनमस्ति। यास्कानुसारेण अस्य जगतः मूले एकस्य देवस्य शक्तिः विद्यमाना वर्तते, सः निरतिशयात् ऐश्वर्यसम्पन्नकारणात् ईश्वरत्वेन कथ्यते। सः एकः अद्वितीयो वर्तते। स एकैव देवः बहुधा पूजितो वर्तते-

**महाभाग्याद् देवताया एक एव आत्मा बहुधा स्तूयते ।**
**एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति ।।**

वैदिकसाहित्ये देवानां स्थूल-सूक्ष्मस्वरूपं च द्विविधरूपेण द्रष्टुं शक्यते। उदाहरणार्थम्-विष्णु-अग्नि-सूर्यदेवानां सूक्ष्म-स्थूलद्विविधस्वरूपं ऋग्वेदे वर्तते।

एवं प्रकारेण वक्तुं शक्यते यत् वैदिके वाक्ये देवविषयिणी अद्वैतसिद्धान्तस्य (एकत्वसिद्धान्तस्य) द्विविधसिद्धान्तस्य अनेकत्वसिद्धान्तस्य च बहुविधा चर्चा समुपलब्ध भवति। परन्तु एतत् सत्यं वर्तते यत् वैदिक-वाङ्मये देवसम्बन्धिविषयस्य बहुविधरूपेण प्रतिपादनं दृश्यते। इदानीं मनसि जिज्ञासा आयाति यत् वैदिकवाङ्गय-स्थानां देवानां पुराणस्थानां देवानां मध्ये कीदृशो भेदो वर्तते? वैदिककालस्य देवानां स्वरूपं पुराणदेवेभ्यः किंचित् भिन्नं दृश्यते। वैदिकवाङ्मये येषां देवानां निरूपणं दृश्यते तेषां देवानां स्वरूपनिर्धारणं पुराणे कुत्रचित् साम्यरूपेण कुत्रचिच्च वैषम्यरूपेण दृश्यते। उदाहरणार्थम्-वैदिककालस्य वरुणदेवः अत्यन्त-उदाररूपेण, न्यायप्रियरूपेण, सर्वकर्मफलप्रदातारूपेण, ऐश्वर्यसम्पन्नदेवत्वेन विश्वस्य प्रत्येकस्य पदार्थस्य ज्ञाता रूपेण च उपतिष्ठति, परन्तु पौराणिककाले वरुणदेवस्य स्वरूपं केवलं जलदेवरूपेण विद्यते। पौराणिक-साहित्ये वरुणदेवस्य उदात्त-न्यायप्रिय ऐश्वर्यसम्पन्नस्वरूपः न वर्णितः अस्ति। क्व तस्य वरुणस्य उदात्तवैदिकं स्वरूपं क्व च जलदेवत्वरूपेण तस्य पौराणिकविग्रहः। वैदिककालस्य देवेषु विष्णु-रुद्रौ प्रमुखदेवौ स्तः। केचन् विद्वान्सः गणेशदेवं पुराणकालस्य रचनां स्वीकुर्वन्ति, परन्तु एतत् सत्यं नास्ति। बहवः विद्वान्सः स्वीकुर्वन्ति यत् गणपतिदेवः वैदिककालस्य देवो वर्तते, येषां स्तुतिः वैदिकसंहितासु ब्रह्मणस्पतिरूपेण प्राप्यते। पौराणिककाले केषांचित् देवानां विषये नवीनकल्पना जागृता अभवत्। यथा शक-कुषाणयोः काले उपास्यदेवस्य सूर्यस्य तान्त्रिकानुष्ठानरूपेण प्रचलितमासीत्। भविष्यपुराणे सुस्पष्टतया स्वीकृतिः वर्तते यत् भारतवर्षे सूर्योपासकानाम-भावत्वात्। विष्णुवाहनः गरुडः शकद्वीपात् ब्राह्मणान् सूर्योपासनाय आनीतवान्। यद्यपि वैदिककाले सूर्यदेवस्य उपासना सात्त्विकरूपेण भवति स्म, परन्तु सैव उपासना पौराणिककाले तान्त्रिकरूपेण निर्दिष्टा वर्तते। पौराणिककाले अभिनव हनुमतः स्वरूपदर्शनं भवति। रामचन्द्रस्य उपासनया सह तस्य अनन्यसेवकस्य हनुमतः उपासनायाः प्रसारः सर्वथाः नैसर्गिको वर्तते। हनुमत्पूजायाः प्रसारः दशमशतकात् प्राक् अभवत्।

वैदिककालस्य पौराणिककालस्य च देवानां स्वभाव-स्वरूपविषये प्रायः भेदः द्रष्टुं शक्यते। वैदिककाले केषांचित् देवानां स्वरूपं निर्गुणरूपेण सगुणरूपेण च प्राप्यते, परन्तु पौराणिककाले देवानां स्वरूपं सगुणरूपेण सुस्पष्टतया द्रष्टुं शक्यते। पौराणिककालस्य मानवः देवानां अत्यन्तसन्निकटे आसीत्। सांसारिकदुःखेन सन्तप्तः मानवः स्वकीयां दुःखदगाथां श्रावयितं कस्यचित् दुःखशमनस्य देवस्य अन्वेषणं करोति स्म, यः सन्तप्तस्य मानवस्य दुःखशमन कृत्वा अमृतौषधिप्रदानं करिष्यति. अस्थिर मानवमानसे च स्वस्थं विधाय शान्तिप्रदानं करिष्यति- एतादृशानां देवानां परिकल्पना पौराणिकसाहित्ये द्रष्टुं शक्यते। पौराणिकदेवाः अन्तरिक्षे विचरणशीला न अपितु भूतलचरस्य मानवस्य सुखे दुःखे च सहायकत्वेन तिष्ठन्ति। एवं प्रकारेण द्रष्टुं शक्यते यत् वैदिकदेवानाम-पेक्षायां पौराणिकदेवाः मानवस्य सन्निकट सम्बन्धाः आसन्। अस्यां परम्परायां सगुणसमन्विता देवभावना अवतार-वाद रूपेण अस्माकं पुरतः समायाति। देवावतारविपयेन सह भक्तिसूत्राणामपि बीजवपनमभवत्। कर्मकाण्डस्य ज्ञानकाण्डस्य च क्लिष्टत्वात् सरल-सरसतारूपेण भक्तिमार्गः मानवस्य सम्मुखे आयाति। पौराणिकयुगस्य प्रभावत्वात् धर्मसाहित्ये भक्तिमार्गस्य अभिनवं स्वरूपं द्रष्टुं शक्यते। इति।।

**-सम्पादक सहायकः**
**दि.सं.अ**

# शब्दार्था:

## सम्बन्ध सूचक शब्दा:

| | | |
|---|---|---|
| अग्रज: | - | बड़ा भाई |
| अनुज:, निष्ठसहोदर: | - | छोटा भाई |
| अरि: | - | दुश्मन |
| आत्मज: | - | पुत्र |
| आत्मजा | - | पुत्री |
| आलि: | - | सखी |
| आबुत: | - | बहनोई |
| उपपति: | - | जार |
| गणिका | - | वेश्या |
| जनक: | - | पिता |
| जननी | - | माता |
| जामाता | - | दामाद |
| दूती | - | दूती |
| देवर: | - | देवर |
| ननान्दृ ( ननान्दा ) | - | ननद |
| नप्तृ ( नप्ता ) | - | नाती |
| पति: | - | पति |
| पितामह: | - | दादा |
| पितामही | - | दादी |
| पितृव्यपुत्र: | - | चचेरा भाई |
| पितृव्य: | - | चाचा |
| पितृव्यपत्नी | - | चाची |
| प्रपौत्र:, प्रपौत्री | - | पतोतरा ( तरी ) |
| परिचारिका | - | नौकरानी |
| प्रपितामह: | - | परदादा |
| पौत्री | - | पोती |
| पितृष्वसृ ( पितृष्वसा ) | - | बुआ |
| पितृष्वसृपति: | - | फूफा |
| पैतृष्वस्रीय: | - | फुफेरा भाई |
| बन्धु: | - | रिश्तेदार |
| भागिनेय: | - | भानजा |
| भृत्य: | - | नौकर |
| भ्रात्रीय: | - | भतीजा |
| भ्रातृसुता | - | भतीजी |
| मातामह: | - | नाना |
| मातामही | - | नानी |
| मातुल: | - | मामा |
| मातुली | - | मामी |
| मातृष्वसृपति: | - | मौसा |
| मातृष्वस्रीय: | - | मौसेरा भाई |
| मातृष्वसृ | - | मौसी |
| यातृ | - | देवरानी |
| योषित: | - | स्त्री |
| वयस्य: | - | मित्र |
| वृद्धप्रपितामह: | - | वृद्धपरनाना |
| श्याल: | - | साला |
| श्वश्रू: | - | सास |

## मनोहारिन्=मन को हरने वाला

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मनोहारि | मनोहारिणी | मनोहारीणि |
| द्वितीया | मनोहारि | मनोहारिणी | मनोहारीणी |
| तृतीया | मनोहारिणा | मनोहारिभ्याम् | मनोहारिभिः |
| चतुर्थी | मनोहारिणे | मनोहारिभ्याम् | मनोहारिभ्यः |
| पञ्चमी | मनोहारिणः | मनोहारिभ्याम् | मनोहारिभ्यः |
| षष्ठी | मनोहारिणः | मनोहारिणोः | मनोहारिणाम् |
| सप्तमी | मनोहारिणः | मनोहारिणोः | मनोहारिषु |
| सम्बोधन | हे मनोहारिन्! | हे मनोहारिणी | हे मनोहारिणी |

## वर्मन्=कवच

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वर्म | वर्मणी | वर्माणि |
| द्वितीया | वर्म | वर्मणी | वर्माणि |
| तृतीया | वर्मणा | वर्मभ्याम् | वर्मभिः |
| चतुर्थी | वर्मणे | वर्मभ्याम् | वर्मभ्यः |
| पञ्चमी | वर्म | वर्मभ्याम् | वर्मभ्यः |
| षष्ठी | वर्मणः | वर्मणोः | वर्मणाम् |
| सप्तमी | वर्मणि | वर्मणोः | वर्मसु |
| सम्बोधन | हे वर्मन्! | हे वर्मणी | हे वर्मणी |

## ब्रह्म=परब्रह्म

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | ब्रह्म | ब्रह्मणी | ब्रह्माणि |
| द्वितीया | ब्रह्म | ब्रह्मणी | ब्रह्माणि |
| तृतीया | ब्रह्मणा | ब्रह्मभ्याम् | ब्रह्मभिः |
| चतुर्थी | ब्रह्मणे | ब्रह्मभ्याम् | ब्रह्मभ्यः |
| पञ्चमी | ब्रह्मणः | ब्रह्मभ्याम् | ब्रह्मभ्यः |
| षष्ठी | ब्रह्मणः | ब्रह्मणोः | ब्रह्मणाम् |
| सप्तमी | ब्रह्मणि | ब्रह्मणोः | ब्रह्मसु |
| सम्बोधन | हे ब्रह्मन्! | हे ब्रह्मणी | हे ब्रह्मणी |

# धातु रूपम्

## रा = देना ( परस्मैपदी )

### ( लट् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुष-** | राति | रात: | रान्ति |
| **मध्यमपुरुष-** | रासि | राथ: | राथ |
| **उत्तमपुरुष-** | रामि | राव: | राम: |

### ( लिट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | ररौ | ररतुः | ररु: |
| **मध्यमपुरुष-** | ररिथ, रराथ | ररथुः | रर |
| **उत्तमपुरुष-** | ररौ | ररिव | ररिम |

### ( लुट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | राता | रातारौ | रातार: |
| **मध्यमपुरुष-** | रातासि | रातास्थ: | रातास्थ |
| **उत्तमपुरुष-** | रातास्मि | रातास्व: | रातास्म: |

### ( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | रास्यति | रास्यत: | रास्यन्ति |
| **मध्यमपुरुष-** | रास्यसि | रास्यथ: | रास्यथ |
| **उत्तमपुरुष-** | रास्यामि | रास्याव: | रास्याम: |

### ( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | रातु, रातात् | राताम् | रान्तु |
| **मध्यमपरुष-** | राहि, रातात् | रातम् | रात |
| **उत्तमपुरुष-** | राणि | राव | राम |

### ( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | अरात् | अराताम् | अरु:, अरान् |
| **मध्यमपुरुष-** | अरा: | अराताम् | अरात |
| **उत्तमपुरुष-** | अराम् | अराव | अराम |

( विधिलिङ् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुष–** | रायात् | रायाताम् | रायु: |
| **मध्यमपुरुष–** | राया: | रायातम् | रायात |
| **उत्तमपुरुष–** | रायाम् | रायाव | रायाम |

( आ. लि. लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | रायात् | रायास्ताम् | रायासु: |
| **मध्यमपुरुष–** | राया: | रायास्तम् | रायास्त |
| **उत्तमपुरुष–** | राप्यासम् | राप्यास्व | राप्यास्म |

( लुङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अरासीत् | अरासिष्टाम् | अरासिषु: |
| **मध्यमपुरुष–** | अरासी: | अरासिष्टम् | अरासिष्ट |
| **उत्तमपुरुष–** | अरासिषम् | अरासिष्व | अरासिष्म |

( लृङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अरास्यत् | अरास्यताम् | अरास्यन् |
| **मध्यमपुरुष–** | अरास्य: | अरास्यताम् | अरास्यत |
| **उत्तमपुरुष–** | अरास्यम् | अरास्याव | अरास्याम |

**रुद् = रोना ( परस्मैपदी )**

( लट् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुष–** | रोदति | रुदित: | रुदन्ति |
| **मध्यमपुरुष–** | रोदषि | रुदिथ: | रुदिथ |
| **उत्तमपुरुष–** | रोदिमि | रुदिव: | रुदिम: |

( लिट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | रुरोद | रुरुदतु: | ररुदु: |
| मध्यमपुरुष– | रुरोदिथ | रुरुदथु: | रुरुद |
| **उत्तमपुरुष–** | रुरोद | रुरुदिव | रुरुदिम |

( लुट् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुष-** | रोदिता | रोदितारौ | रोदितार: |
| **मध्यमपुरुष-** | रोदितासि | रोदितास्थ: | रोदितास्थ |
| **उत्तमपुरुष-** | रोदितास्मि | रोदितास्व: | रोदितास्म: |

( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | रोदिष्यति | रोदिष्यत: | रोदिष्यन्ति |
| **मध्यमपुरुष-** | रोदिष्यसि | रोदिष्यथ: | रोदिष्यथ |
| **उत्तमपुरुष-** | रोदिष्यामि | रोदिष्याव: | रोदिष्याम: |

( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | रोदितु | रुदिताम् | रुदन्तु |
| **मध्यमपरुष-** | रोदिहि | रुदितम् | रुदित |
| **उत्तमपुरुष-** | रोदानि | रोदाव | रोदाम |

( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | अरोदीत्, अरोदत् | अरुदिताम् | अरुदन् |
| **मध्यमपुरुष-** | अरोदी:,अरोद: | अरुदितम् | अरुदित |
| **उत्तमपुरुष-** | अरोदम् | अरुदिव | अरुदिम |

( विधिलङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | रुद्यात् | रुद्याताम् | रुद्यु: |
| **मध्यमपुरुष-** | रुद्या: | रुद्यातम् | रुद्यात |
| **उत्तमपुरुष-** | रुद्याम् | रुद्याव | रुद्याम |

( आ. लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | रुद्यात् | रुद्यास्ताम् | रुद्यासु: |
| **मध्यमपुरुष-** | रुद्या: | रुद्यास्तम् | रुद्यास्त |
| **उत्तमपुरुष-** | रुद्यासम् | रुद्यास्व | रुद्यास्म |

( लुङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | अरोदीत् | अरोदीष्टाम् | अरोदिषु: |
| **मध्यमपुरुष-** | अरोदी: | अरोदीष्टम् | अरोदिष्ट |
| **उत्तमपुरुष-** | अरोदीषम् | अरोदीष्व | अरोदिष्म |

**अथवा**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष-** | अरुदत् | अरुदताम् | अरुदन् |
| **मध्यमपुरुष-** | अरुदः | अरुदतम् | अरुदत |
| **उत्तमपुरुष-** | अरुदम् | अरुदाव | अरुदाम |

**( लृङ् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | अरोदिष्यत् | अरोदिष्यताम् | अरोदिष्यन् |
| **मध्यमपुरुष-** | अरोदिष्यः | अरोदिष्यतम् | अरोदिष्यत |
| **उत्तमपुरुष-** | अरोदिष्यम् | अरोदिष्याव | अरोदिष्याम |

**ला = लेना ( परस्मैपदी )**
**( लट् लकार )**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष-** | लाति | लातः | लान्ति |
| **मध्यमपुरुष-** | लासि | लाथः | लाथ |
| **उत्तमपुरुष-** | लामि | लावः | लामः |

**( लिट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | ललौ | ललतुः | ललः |
| **मध्यमपुरुष-** | ललिथ, ललाथ | ललथुः | लल |
| **उत्तमपुरुष-** | ललौ | ललिव | ललिम |

**( लुट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | लाता | लातारौ | लातारः |
| **मध्यमपुरुष-** | लातासि | लातास्थः | लातास्थ |
| **उत्तमपुरुष-** | लातास्मि | लातास्वः | लातास्मः |

**( लृट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | लास्यतः | लास्यतः | लास्यन्ति |
| **मध्यमपुरुष-** | लास्यसि | लास्यथः | लास्यथ |
| **उत्तमपुरुष-** | लास्यामि | लास्यावः | लास्यामः |

**( लोट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | लातु, लातात् | लाताम् | लान्तु |
| **मध्यमपरुष-** | लाहि, लातात् | लातम् | लात |
| **उत्तमपुरुष-** | लानि | लाव | लाम |

( लङ् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष– | अलात् | अलाताम् | अलु:, अलान् |
| मध्यमपुरुष– | अला: | अलातम् | अलात |
| उत्तमपुरुष– | अलाम् | अलाव | अलाम |

( विधिलिङ् लकार )

| | | | |
|---|---|---|---|
| प्रथमपुरुष– | लायात् | लायास्ताम् | लायु: |
| मध्यमपुरुष– | लाया: | लायास्तम् | लायात |
| उत्तमपुरुष– | लायाम् | लायास्व | लायाम |

( आ. लकार )

| | | | |
|---|---|---|---|
| प्रथमपुरुष– | लायात् | लायास्ताम् | लायासु: |
| मध्यमपुरुष– | लाया: | लायास्तम् | लायास्त |
| उत्तमपुरुष– | लायासम् | लायास्व | लायास्म |

( लुङ् लकार )

| | | | |
|---|---|---|---|
| प्रथमपुरुष– | अलासीत् | अलासिष्टाम् | अलासिषु: |
| मध्यमपुरुष– | अलासी: | अलासिष्टम् | अलासिष्ट |
| उत्तमपुरुष– | अलासिषम् | अलासिष्व | अलासिष्म |

( लृङ् लकार )

| | | | |
|---|---|---|---|
| प्रथमपुरुष– | अलस्यत् | अलास्यताम् | अलास्यन् |
| मध्यमपुरुष– | अलास्य: | अलास्यतम् | अलास्यत |
| उत्तमपुरुष– | अलास्यम् | अलास्याव | अलास्याम |

**लिह् = चाटना ( परस्मैपदी )**

( लट् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष– | लेढि | लीढ: | लिहन्ति |
| मध्यमपुरुष– | लेक्षि | लीढ: | लीढ |
| उत्तमपुरुष– | लेह्मि | लीह्व: | लाह्म: |

( लिट् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष– | लिलेह | लिलिहतु: | लिलिहु: |
| मध्यमपुरुष– | लिलेहिथ | लिलिहथु: | लिलिह |
| उत्तमपुरुष– | लिलेह | लिलिहिव | लिलिहिम |

( लुट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | लेढा | लेढारौ | लेढारः |
| **मध्यमपुरुष–** | लेढासि | लेढास्थः | लेढास्थ |
| **उत्तमपुरुष–** | लेढास्मि | लेढास्वः | लेढास्मः |

( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | लेक्ष्यति | लेक्ष्यतः | लेक्ष्यन्ति |
| **मध्यमपुरुष–** | लेक्ष्यसि | लेक्ष्यथः | लेक्ष्यथ |
| **उत्तमपुरुष–** | लेक्ष्यामि | लेक्ष्यावः | लेक्ष्यामः |

( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | लेढु, लीढात् | लीढाम् | लिहन्तु |
| **मध्यमपरुष–** | लीढि, लीढात् | लीढम् | लीढ |
| **उत्तमपुरुष–** | लेहानि | लेहाव | लेहाम |

( लङ् लकाल )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अलेट्,ड् | अलीढाम् | अलिहन् |
| **मध्यमपुरुष–** | अलेट्,ड् | अलीढम् | अलीढ |
| **उत्तमपुरुष–** | अलेहम् | अलिह्व | अलिह्म |

( विधिलङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | लिह्यात् | लिह्याताम् | लिह्युः |
| **मध्यमपुरुष–** | लिह्याः | लिह्यातम् | लिह्यात |
| **उत्तमपुरुष–** | लिह्याम् | लिह्याव | लिह्याम |

( आ. लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | लिह्यात् | लिह्यास्ताम् | लिह्यासुः |
| **मध्यमपुरुष–** | लिह्याः | लिह्यास्तम् | लिह्यास्त |
| **उत्तमपुरुष–** | लिह्यासम् | लिह्यास्व | लिह्यास्म |

**–सम्पादक सहायकः**
**दि.सं.अ.**

सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

## "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ
सम्पूर्ण देश के वरिष्ठ-बाल-साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

## "संस्कृत-चन्द्रिका"

( आई.एस.एस.एन.-2347–1565 )

**संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की मासिक बाल पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।**

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका

## "संस्कृत-चन्द्रिका"

के स्थायी अध्येता बनें।

**आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 0170104000 2562285, आई.एफ.सी. कोड- IBKL 0000170 (IDBI BANK- Preet Vihar) में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।**

पत्र व्यवहार का पता -

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२०९२०३६३**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.-५,
झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
से प्रकाशित